तत्पर्य्यायः। उपचर्य्या २ चिकित्सा ३ रुक्प्रतिक्रिया ४ निग्रहः ५ वेदनानिग्रहा ६ क्रिया ७ उपक्रमः ८ शमः ९। इति राजनिर्घण्टः॥ सेवा। ("स मे चिरायास्खलितोपचाराम्"। इति रघौ, ५। २०।) व्यवहारः। ("प्रयुक्तपाणिग्रहणोपचारौ"। इति कुमारे ७। ८६।) उत्कोचः। इति हेमचन्द्रः॥ परस्य रञ्जनार्थं असत्यभाषणम्। यथा, कुमारे ४। ९। "उपचारपदं नचेदिदं त्वमनङ्गः कथमक्षता रतिः"॥ "उपचारच्छला दाक्ष्यं" इति चरके सूत्रस्थाने नवमेऽध्याये॥)

उपचार्य्यः, पुं, (उप + चर + ण्यत्।) चिकित्सा। इति हेमचन्द्रः॥

उपचितः, त्रि, (उपचीयते स्म। उप + चि + क्त।) दिग्धः। समृद्धः। इति विश्वमेदिन्यौ॥ (यथा रघौ ९ म—सर्गे,। "मृगवयोगवयोपचितं वनम्"।) समाहितः। इति विश्वः हेमचन्द्रश्च॥ निदिग्धः। लेपादिना वर्द्धितः। इत्यमरः॥ ("यथाह हारीतः।
"प्रयतत्वाद्वोपचितमशुभं नाशयतीति"॥)

उपचित्रा, स्त्री, (उपगता चित्राम्।) मूषिकपर्णी। इत्यमरः। इँदुरकानि इति भाषा। दन्तीवृक्षः। इति राजनिर्घण्टः॥ (दन्त्यर्थे यथा,—
"चित्रा दन्ती निकुम्भः स्यादुपचित्रा मुकूलकः"। इति वैद्यकरत्नमाला॥)

उपजापः, पुं, (उप + जप् + घञ्।) भेदः। विच्छेदः। इत्यमरः॥
("तेषु तेषु चाक्षतेषु प्रासरन् परोपजापाः"। इति दशकुमारे विश्रुतचरिते। तथा च माघे २। ९९।
"उपजापः कृतस्तेन तानाकोपवतस्त्वयि"॥)

उपजिह्वा, स्त्री, (उपगता जिह्वा यस्याः।) कीटविशेषः। तत्पर्य्यायः। उपदेहिका २ वम्री ३ उद्दीका ४। इति हेमचन्द्रः॥ आलजिह्वा इति ख्याता च॥ ("उपजिह्वा स्फिचौ बाहू"। इति याज्ञवल्क्यः।
"तादृगेवोपजिह्वा तु जिह्वाया उपरि स्थिता"॥ इति वाभटेनोत्तरस्थाने एकविंशेऽध्याये उक्तम्॥
चिकित्सा यथा।
"उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत्"। इति च वाभटेनोत्तरस्थाने द्वाविंशेऽध्याये उक्तम्॥)

उपजिह्विका, स्त्री, (उपजिह्वा + स्वार्थे कन्।) घण्टिका। आलजिव इति भाषा। तत्पर्य्यायः। प्रतिजिह्वा २। इति राजनिर्घण्टः॥ (ऋग्वेदे ४। ९१। २१। "यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति"।) कीटभेदः। तत्पर्य्यायः। उत्पादिका २ वटिः ३ उद्देहिका ४ दिवी ५। इति हारावली॥ ("यस्य श्लेष्मा प्रकुपितो जिह्वामूलेऽवतिष्ठते। आशु संजनयेत् शोथं जायतेऽस्योपजिह्विका"॥ इति चरके सूत्रस्थाने १८ अध्यायः॥
"जिह्वाग्ररूपः श्वयथुर्हि जिह्वा-
मुन्नम्य जातः कफरक्तयोनिः।
प्रसेककण्डूपरिदाहयुक्ता
प्रकथ्यतेऽसावुपजिह्विकेति"॥
इति निदानस्थाने षोड़शेऽध्याये सुश्रुतेनोक्तम्॥
अस्य चिकित्सा यथा।
"उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनमुपाचरेत्।
जिह्वागतानां कर्म्मोक्तं तालव्यानां प्रवक्ष्यते"॥
इति सुश्रुते चिकित्सितस्थाने २२ अध्यायः॥)

उपजीविका, स्त्री, (उपजीव्यतेऽनया। उप + जीव + गुरोश्चेत्यः। संज्ञायां कन् वुन् वा।) उपजीव्यम्। जीवनोपायः॥

उपजोषम्, व्य, (उपजोषणम्। उप + जुष + अम्।) आनन्दः। इत्यमरः॥ (यथा, महाभारते १।
"यथोपजोषं सर्व्वश्च जनश्चिक्रीड़ भारत"।
सुखं। यथा, रामायणे २। ८९। २२।
"आश्वासयित्वा च चमूं महात्मा
निवेशयित्वा च यथोपयोषम्"॥)

उपज्ञा, स्त्री, (उपज्ञायते। ज्ञा अवबोधने। आतश्चोपसर्गे इति कर्म्मणि अङ्।) आद्यज्ञानम्। इत्यमरः॥ तत्तु विनोपदेशेन प्रथमज्ञानम्। यथा वाल्मीकेः श्लोकनिर्म्माणे ज्ञानम्॥
("अथ प्राचेतसोपज्ञं रामायणमितस्ततः"॥ इति रघुः १५। ६३॥ "लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः" इति मल्लिनाथटीकामुखम्॥)

उपढौकनं, क्ली, (उप + ढौक + ल्युट्।) पारितोषिकद्रव्यम्। भेट् डाला इत्यादि भाषा। तत्पर्य्यायः। प्राभृतम् १ प्रदेशनम् २ उपायनम् ३ उपग्राह्यः ४ उपहारः ५ उपदा ६। इत्यमरः॥

उपतप्ता, [ऋ] पुं, (उप + तप् + तृच्।) उपतापकमात्रम्। तत्पर्य्यायः। स्पर्शः २ स्प्रष्टा ३। इत्यमरः॥ स्पशः ४ स्पर्द्धः ५। इति तट्टीका॥ रोगइत्यन्ये। इति भरतः॥

उपतापः, पुं, (उप + तप् + घञ्।) त्वरा। उत्तापः। रोगः। इति मेदिनी॥ अशुभम्। पीड़ा। इति शब्दरत्नावली॥ (यथा, शाकुन्तले।
"विवक्षितं ह्यनुक्तं उपतापं जनयति"।
पीड़ादायके वाच्यलिङ्गः। यथा, कौशिकसूत्रे। १३५। "यो वनस्पतीनामुपतापो बभूव"॥)

उपत्यका, स्त्री, (उप समीपे आसन्ना भूमिः। उप + "उपाधिभ्यां त्यकन्नासन्नारूढ़योः"। ५। २।३४। इति त्यकन्। "त्यकनश्च निषेधः" इति इत्वाभावः।) पर्व्वतनिकटभूमिः। इत्यमरः॥ (यथा, रघुः। ४। ४६।
"मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः"॥)

उपदंशः, पुं, (उपदश्यते इति। उप + दंश + कर्म्मणि घञ्।) मद्यपानरोचकभक्ष्यद्रव्यम्। तत्पर्य्यायः। अवदंशः २ चक्षणम् ३ मद्यपासनम् ४। इति हेमचन्द्रः॥ (यथा दशकुमारे विश्रुतचरिते—
"द्विचान् उपदंशान् उपपाद्य"।
"ततस्तस्य शाल्योदनस्य दर्व्वीद्वयं दत्त्वा सर्पिर्मात्रां सूपम् उपदंशं च उपजहार"। इति च।) मेढ्ररोगविशेषः। वाघी इति भाषा। अथोपदंशाधिकारः। तत्रोपदंशस्य विप्रकृष्टं निदानमाह।
"हस्ताभिघातान्नखदन्तघाता-
दधावनादत्युपसेवनाद्वा।
योनिप्रदोषाच्च भवन्ति शिश्ने
पञ्चोपदंशा विविधोपचारैः"॥
हस्ताभिघातात् हस्तेन मैथुनात्। नखदन्तघातात् नखदन्तघातस्थानत्वेनानुक्तोऽपि मेहने नखदन्तघातो बलवदनुरागोदयात्। उक्तञ्च कामशास्त्रे।
"शास्त्रस्य विषयस्तावद्यावन्मन्दतरो रसः।
रतिचक्रे प्रवृत्ते तु न शास्त्रं नापि च क्रमः"॥
कलहे दुष्टस्त्रीकृतो वा मेहने नखदन्तघातः। उत्कलादौ स्त्रियो मुखयोनयो भवन्ति। ताभिर्व्वा मेहने नखदन्तघातः। योनिप्रदोषात् दीर्घकर्कशयोनिलोमयोगात्। योनिच्छिद्रस्यातिसूक्ष्मत्वाद्वा। वातादिकृताद्वा योनिदोषात्। विविधोपचारैः। दुष्टजलप्रक्षालनब्रह्मचारिणीगमनादिभिः पञ्चोपदंशाः। वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः आगन्तुजश्चेति॥ * ॥ तत्र वातिकपैत्तिकस्य चोपदंशस्य लक्षणमाह।
"सतोदभेदस्फुरणैस्तु कृष्णैः
स्फोटैर्व्यवस्येन्मरुतोपदंशम्।
पीतैर्बहुक्लेदयुतैः सदाहैः
पित्तेन रक्तैः पिशितावभासैः"॥
व्यवस्येत् जानीयात्। पीतैः रक्तैर्व्वेति विकल्पः॥*॥ श्लैष्मिकं सान्निपातिकञ्चाह।
"सकण्डुरैः शोफयुतैर्म्महद्भिः
शुक्लैर्घनैः स्रावयुतैः कफेन।
नानाविधस्रावरुजोपपन्न-
मसाध्यमाहुस्त्रिमलोपदंशम्"॥ * ॥
असाध्यमाह।
"विशीर्णमांसं कृमिभिः प्रजग्धं
मुष्कावशेषं परिवर्ज्जयेत्तम्"।
विशीर्णमांसं गलितमांसम्। प्रजग्धं खादितम्। मुष्कावशेषं विशीर्णसमस्तमेहनमांसत्वेनावशिष्टफलकोषमात्रम्॥ * ॥ उत्पन्नमात्रचिकित्सायाः अकरणे दोषमाह।
"सञ्जातमात्रे न करोति मूढ़ः
क्रियां नरो यो विषये प्रसक्तः।
कालेन शोफक्रिमिदाहपाकैः
प्रशीर्णशिश्नो म्रियते स तेन"॥
विषये प्रसक्तः अतिस्त्रीरतः॥ * ॥ लिङ्गार्शमाह।
"अङ्कुरैरिव संजातैरुपर्य्युपरि संस्थितैः।
क्रमेण जायते वर्त्तिस्ताम्रचूड़शिखोपमा॥
कोषस्याभ्यन्तरे सन्धौ पर्व्वसन्धिगतापि च।
सवेदना पिच्छिला च दुश्चिकित्स्या त्रिदोषजा॥
लिङ्गवर्त्तिरिति ख्याता लिङ्गार्श इति चापरे"॥
लिङ्गवर्त्तेः स्थानमाह। कोषाभ्यन्तरे अण्डकोषाभ्यन्तरे। सन्धौ लिङ्गरन्ध्रसन्धौ। पर्व्वसन्धिगता मणिपर्व्वणोः सन्धिगता॥ * ॥ * ॥
अथोपदंशस्य चिकित्सा।
"उपदंशेषु सर्व्वेषु स्निग्धं स्विन्नस्य देहिनः।